RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23
Posting Date.: 4-5, 19-20 of Every Month

॥ ओ३म् ॥
दरिद्रता धीरतया विराजते।
कुवस्त्रता शुभ्रतया विराजते॥

छिन्नेपि चन्दनतरूर्न
जहाति गन्धं।
वद्धोपि वारणपतिर्न
जहाति लीलाम्॥
यन्त्रोर्पितो मधुरतां न जहाति चेक्षुः।
क्षीणोपि न त्यजति शीलगुणान्कुलीनः॥
(आचार्य चाणक्य)

# संस्कृत – संवादः

सत्यनिष्ठा जयेल्लेखनी निर्भया

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥
यथा खनन् खनित्रेण भूतले
वारि विन्दति।
तथा गुरूगतां विद्यां
शुश्रुषूरधिगच्छति॥

तादृशी जायते बुद्धिर्व्यवसायोपि
तादृशः।
सहायास्तादृशा एव
यादृशी भवितव्यता॥
(विदुरनीति)

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

卐 वर्षम्-१२ 卐 अंकः-२१ (२८५) नवदेहली 卐 १ मईमासः २०२३तः १५ मईमासः २०२३ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

## महर्षिदयानन्दसरस्वत्याः २००तमजयन्तीमुद्दिश्य अखिलभारतीयवेदविज्ञानसम्मेलनमायोजितम्

नवदिल्ली। पूसा संस्थानस्य सुब्रमण्यममहाकक्षे द्वि दिवसीयं सम्मेलन विश्व वेद परिषद् नई दिल्ली, परमार्थ निकेतन ऋषिकेशः , कृषि एवं अनुसंधान परिषद् नई दिल्ली , एवं पतंजलि विश्वविद्यालयश्च इत्येषां संयोजने संपन्नम्। कार्यक्रमे आरम्भे भजनं संकीर्तनं, राष्ट्रगानं , जवाहरलालनेहरुविश्वविद्यालयच्छात्रैः वैदिक मंगलाचरणं, अतिथिभिः दीपः च प्रज्वलितः।



मुख्यातिथिः लोकसभा अध्यक्षः, ओम बिरला साथ विशिष्टखतिथिः, कृषि राज्य मंत्री कैलाश चौधरी, पूर्व केंद्रीय मंत्री डॉ सत्यपाल सिंहः, परमार्थ निकेतन ऋषिकेशस्य अध्यक्ष स्वामी चिदानंदः, आचार्यः प्रेमपाल शास्त्री, कृषि अनुसंधान परिषदः महानिदेशकः आर सी अग्रवालः, सांसद स्वामी आर्यवेशः स्वामी प्रणवानंद सरस्वती कार्यक्रमाध्यक्षः केंद्रीय कृषि एवं कृषक कल्याण मंत्री श्री नरेंद्र सिंह तोमरः च उपस्थिताः आसन् स पूर्वमंत्री डॉ सत्यपाल सिंहः वेदानां महत्वस्य विवेचनां कृतवान्। केंद्रीय कृषि राज्य मंत्री श्री कैलाश चौधरी उक्तवान् यत् सृष्ट्युत्पत्त्या सह वेदरचना अभूत् तत्र विज्ञानेन सह योगः, पर्यावरणं ,कृषिः, जल संरक्षणं चेत्येषां ज्ञानं वर्तते। स्वामी चिदानंदः कथितवान् यत् कि वर्तमाने अस्मद् देशः महद्भारतरूपेण समाख्यातुं सन्नद्धम्। तस्यां दिशि च अग्रसरं वर्तते। तस्य कारणं वेदेषु निहितं ज्ञानमेव। विज्ञानम् अध्यात्मं च सम्मिल्य

शेषभागः:अष्टमपुटे

## अखिलभारतीय-संस्कृतच्छात्रप्रातिभसमारोहे पाणिनिसंस्कृतविश्वविद्यालयस्य छात्राः पुरस्कृताः

(वृत्तप्रेषकः डॉ.दिनेशः चौबे)

तिरूपतिस्थराष्ट्रियसंस्कृत विश्वविद्यालये आयोजिते अखिलभारतस्तरीय संस्कृतच्छात्रप्रातिभसमारोहे उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य न्यायदर्शनविभागस्य छात्रेणश्री उद्धवपौराणिकेन न्यायभाषण प्रतियोगितायां द्वितीयस्थानं रजतपदकं च् प्राप्तम्। अस्यां प्रतियोगितायां वेदान्तभाषणे सुश्री नीताशर्मा तृतीयं स्थानं कास्यपदकं च अर्जितवती। एवञ्च रसप्रश्न स्पर्धायां सुश्रीनिधीशर्मा, सुश्रीनीताशर्मा च तृतीयं स्थानं प्राप्तवत्यौ आभारतात् नाना संस्थाभ्यः समागताः



छात्राः अत्र भागं गृहीतवन्तः। अस्मिन् अवसरे विश्वविद्यालयस्य मान्यनीयकुलपतिः आचार्यविजयकुमारसीजीवर्यः उक्तवान् यत् अस्माकं विश्वविद्यालयस्य छात्राः देशे सर्वत्र नाना संस्थासु गत्वा पुरस्काराः अर्जयन्ति विश्वविद्यालयस्य गौरवं च वर्धितवन्तः।अस्माकं छात्राःसर्वत्र

शेषभागः:द्वितीयेपुटे

## पतंजलौ ‘उन्नतरीत्या सह आयुर्वेदमाध्यमेन समग्र-स्वास्थ्यविषये’ त्रिदिवसीयम् अन्ताराष्ट्रियं सम्मेलनम्

हरिद्वारम्। पतंजलेः प्रयासैः योगाय आयुर्वेदाय च वैश्विक स्तरे स्वीकारिता प्राप्ता - आचार्यः बालकृष्णः हरिद्वारम्। आयुष मंत्रालय, भारत सरकार द्वारा सेंटर ऑफ एक्सीलेंसतः सम्मानितः पतंजलि आयुर्वेद चिकित्सालयस्य अन्तर्गतम् ‘उन्नत तकनीक्या सह आयुर्वेद माध्यमेन समग्र स्वास्थ्य प्राप्तिः (Achieving Holistic Health through A yurveda alongwith Advanced




Technologies)’ विषये त्रिदिवसीय अंतर्राष्ट्रीय सम्मेलनम् आयोजितम् । पतंजलि अनुसंधान संस्थानं पतंजलि विश्वविद्यालयः इत्यनयोः सहयोगेन इदं सम्मेलनं पतंजलि विश्वविद्यालय, हरिद्वार स्थिते सभागारे प्रारब्धम्।

अवसरेस्मिन् स्वामी रामदेवः कथितवान् यत् योगः, आयुर्वेदश्च सनातन संस्कृतौ प्रसरितां दरिद्रतां दूरीकृत्य परम वैभवं यावत् नयन्तौ स्तः। कार्यक्रमे आचार्य बालकृष्णः कथितवान् यत् अद्य वयम् आयुर्वेदे एडवांस टेक्नोलॉजी इत्यस्य क वार्ता तु कुर्मः तत्सम्यगपि प्रतिभाति। एकः समयः आसीत् यत् एतत्सर्वं अनुपममिव आसीत् । प्रथमं तु आयुर्वेदे तथ्यं प्रमाणं न आसीत् अतः वैश्विक स्तरे ख्यातिः न लब्धा। पतंजलेः प्रयासैः अद्य योगाय आयुर्वेदाय च वैश्विक स्तरे स्वीकारिता लब्धा वर्तते । सम्मेलने मुख्यः अतिथिः नेशनल कमिशन फॉर इण्डियन सिस्टम ऑफ मेडिसिन-अध्यक्षः वैद्य जयंत देवपुजारी ने कथितवान् यत् इंटिग्रेटेड मेडिसिन एकः एतादृशविषयः सर्व समावेशकः, सर्व सम्मतः च। निम्स (एनआईआईएमएस) यूनिवर्सिटी,

शेषभागः:तृतीयेपुटे

## भारतम् एकं हिंदुराष्ट्रम् अस्मभिः अखण्डं निर्मातव्यम् - जगद्गुरुः शंकराचार्यः निश्चलानन्दः सरस्वती



नवदिल्ली ( सुनीलमित्तलः ) भारतं हिंदू राष्ट्रं पूर्वतः पाकिस्तानं बांग्लादेशं अस्मिन् समाहृत्य अखंडं भविष्यति। अयम् उद्गारः गोवर्धनपुरीजगद्गुरु शंकराचार्य निश्चलानंद सरस्वती व्यक्तीकृतवान् स तेनोक्तं यत् बहुवर्षेभ्यः भ्रमः प्रसार्यते यत् हिंदूशब्दः अरबतः आगतः। सत्रृग्वेदे, कालिका पुराणे भविष्य पुराणे च अयम् उल्लेखः लभ्यते। आदिशंकराचार्यस्य 2530 तमायाः जयंत्याः अवसरे राष्ट्रिये उत्कर्ष महाधिवेशने स्वीयं वक्तव्यं महाभागेन अमुना अभिव्यक्तम्। यत् मोहम्मद साहबः और ईसा मसीहः इत्यनयोः पूर्वजाः समेपि सनातन धर्मं मन्वते स्म। भारतं विश्वस्य हृदयं राम कृष्ण रूपेण जगदीश्वरः अत्र अवत्तीर्णः सीता, रुकमणी, राधा रानी इत्येषां रूपेण मातृशक्तयः अत्र उपस्थिताः तेन प्रोक्तं यत् पृथ्वी, जलम्, आकाशः, वायुः, च इत्येतानि ऊर्जास्रोतांसि। तेषु विकृतेषु सत्सु समाजः प्रभावितः। वर्तमान विकासः एतान् विकृतान् कुरुते। राजनीतिं प्रति तेन कथितं यत् सुसंस्कृतं, सुशिक्षितं, सुरक्षितं, संपन्नं स्वच्छजनं, समाजं च निर्मातुर्नाम राजनीतिः। मठ मंदिराणि समाजस्य उपकाराय कार्यं कुर्वते स एषाम् ऊपरि सर्वकारस्य अधिकारः न्यायपूर्णः न । भगवत तत्त्वस्य अनुसंधानमेव धर्मः कार्यक्रमे पूर्व राज्यसभा सदस्यः सुब्रह्मण्यम स्वामी कथितवान् यत् भारते हिंदू राष्ट्राय बलं दातुं संस्कृतम् अनिवार्यं वर्तते। तेनैव एतत्साकारीभवितुमर्हति।

# उत्तरप्रदेशसंस्कृतसंस्थानम् आनलाइनसंस्कृतसम्भाषणे भारतस्य प्रथमं संस्थानम्

-धीरज मैठाणी

लखनऊ। समाजे सर्वत्राधुना संस्कृतभाषाशिक्षण समुन्नेतुम् उत्तरप्रदेशसंस्कृतसंस्थानं राज्यशैक्षिकानुसंधानप्रशिक्षणपरिषद् चेत्यनयो संयुक्ततत्त्वावधानेन समग्रोत्तरप्रदेशस्य ७५ जिल्लासु बेसिकशिक्षाविभागस्य उच्चप्रथमिकशिक्षकेभ्यः सञ्चाल्य संस्कृतभाषा प्रशिक्षणम् अतीवरुचिकरं कृतम्। अधुना अपि निरन्तरं सामाजिकेभ्यः संस्कृतभाषाशिक्षणं निरन्तरं प्रचलदस्ति। उत्तरप्रदेशसंस्कृतसंस्थानद्वारा संस्कृतभाषां समुन्नेतुं प्रारब्धः कश्चन नूतन प्रकल्पः । यदि भवन्तः देवभाषा संस्कृतंवक्तुं पठितुं च इच्छन्ति चेत्भवत्कृते सुखदं वृत्तमिदं यत् गृहे उपविश्य एव दूरवाणीद्वारा निःशुल्कं प्रशिक्षणाय पञ्जीयनं कर्तुमर्हन्ति। आगामि मे मासाय पञ्जीकरमधुना चलति। देवभाषासंस्कृतं प्रति अनुरागवर्धनाय संस्कृतं पठितुमिच्छुकेभ्यः अवसरं दातुम् उत्तरप्रदेशसंस्कृतसंस्थानपक्षतः एषा व्यवस्था आरब्धा। यत्र चिकित्सकाः, अभियन्तारः व्यवसायिनः, विद्यार्थिनः, वृत्तिवन्तः ये केचन प्रशिक्षणे सहभागितां कर्तुमर्हन्ति । पञ्चदशदिनात्मके पाठ्यक्रमे प्रारम्भे पञ्चदशदिनेषु संस्कृतभाषणस्य परिचयात्मकः पाठ्यक्रमः भविष्यति । प्रशिक्षणमिदं पूर्णतया निश्शुल्कं भविष्यति। तत्र संस्थानस्य मान्यः निदेशकः अस्य वर्षस्य शुभारम्भे डॉ० विनयश्रीवास्तववर्यः अभाषत यत् संस्कृतभाषायाः संस्कारः प्राथमिक शिक्षातः एव प्रभावजन्यः भवति तदर्थं आरम्भे शिक्षकाणां एतादृशभाषा प्रशिक्षणं नूनमेव समपेक्षते । अचिरादेव 'गृहे-गृहे संस्कृतम्' इति अमुष्याः योजनायाः अपि शुभारम्भो भविता तत्र प्रतिजिल्लासु संस्कृत-शिक्षणकेंद्राणि भविष्यन्ति। सम्प्रति २०२३ खीष्टाब्दस्य अप्रैलमासस्य १० तारिकायाः आरभ्य तत्र सामाजिकेभ्यः शिक्षकेभ्यश्च अदः प्रशिक्षणं प्रचलति । आरम्भदिने सत्रारम्भकार्यक्रमे तत्र प्रशिक्षून् उद्बोधयन् प्रशिक्षकः दीनदयालशुक्लः संस्कृतविषयस्य सूक्ष्मांशान् बोधयित्वा प्रशिक्षणं करोति। संस्कृतेन सह तकनीकीम् उपयुज्य कथं विषयः आकर्षकरीत्या उपस्थापनीयः तदर्थ का कल्पना तत्र करणीया? इति सर्वान् बोधितवान् । प्रशिक्षणसमन्वयकः श्रीमान् धीरज मैठाणी संस्कृतभाषापाठन रोचकम् आकर्षक कर्तुं प्रशिक्षकाणां मार्गदर्शनम् अकरोत् । सर्वस्यापि कार्यक्रमस्य प्रशिक्षणस्य संयोजनं आचार्या राधाशर्मा, दिव्यरञ्जनवर्यः चेत्यादयः पश्यन्तः सन्ति। अवसरेऽस्मिन् प्रशासनिकाधिकारी दिनेश मिश्रः, श्रीमान् जगदानन्दझावर्याः, योजना-सर्वेक्षिका डॉ. चन्द्रकला शाक्या चेत्यादिभिः सहिताः समस्तप्रशिक्षवः संस्थानस्य पदाधिकारिणसमुपस्थिताः।

प्रथमपुटस्य शेषभागः **अखिलभारतीय संस्कृतच्छात्रप्रातिभसमारोहे...**

सर्वविधासु प्रतियोगितासु स्वप्रातिभं प्रदर्शितवन्तः। कुलपतिवर्येण मुदितमनसा छात्राणाम् आचार्याणाञ्च अभिनंदनं कृतम् । अवसरेस्मिन् तिरुपति- राष्ट्रियसंस्कृतविश्वविद्यालयस्य प्रातिभसमारोहसमापनमहोत्सवे अनुग्रहभाषणार्थं पूज्यजगद्गुरवः श्रीश्रीशङ्करविजयेन्द्रसरस्वती शङ्कराचार्यस्वामिनः। उपस्थिताः आसन् । येषां करकमलाभ्यां छात्राः पुरुस्कृताः । अस्मिन् अवसरे संस्कृतविश्वविद्यालयस्य , कुलपतिः विद्वांसः आचार्याः ,छात्राः, अन्यजनाश्च उपस्थिताः आसन्। छात्रदलस्य नेतृत्वं साहित्यविभागस्य आचार्येण श्रीआयुषदीक्षितेन कृतम्।




## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिआॅर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# सप्तदिवसस्य सरलसंस्कृतसम्भाषण-शिविरस्योद्घाटनम् अभवत्

-गोपालकृष्णमिश्रः

विगत सोमवासरे संस्कृतभारती-बिहार-द्वारा संस्कृत-सम्भाषणशिविरस्योद्घाटनम् बिहारस्य पूर्वीचम्पारण्यजनपदे अभवत्। उद्घाटनकार्यक्रमे मुख्यातिथिः संस्कृतभारत्याः बिहारप्रान्तस्य प्रान्त-गीताशिक्षणकेन्द्रप्रमुखः डॉ विश्वेशः वाग्मी तथा च सारस्वतातिथिः नगरमन्त्री मोतिहारी डॉ विश्वजित् बर्मन् महोदयः आसीत्। कार्यक्रमस्य अध्यक्षः प्रणेता-क्लासेज इत्यस्य सञ्चालकः श्रीमान् प्रकाशपाण्डेयः आसीत्। 7 दिवसात्मकस्य शिविरस्य प्रशिक्षकः गोपालकृष्णमिश्रः अस्ति।




उद्घाटनं सरस्वतीमातुः चित्रस्योपरि माल्यार्पणं दीपप्रज्ज्वलनञ्च कृत्वा अभवत् । शिविरप्रशिक्षाकेन गोपालकृष्णमहोदयेन सञ्चालनं कुर्वन् संस्कृतस्य महत्ताविषये वदन् संस्कृतसम्भाषणस्य उपयोगिता उक्ता। तेन कथितं यत् जनेषु भ्रान्तिरस्ति यत्




संस्कृतं कठिना भाषा किन्तु संस्कृतभाषा तु बहु सरला भाषा अस्ति। केचन् जनाः वदन्ति यत् संस्कृतं तु पण्डितानां भाषा अस्ति परन्तु एवं किमपि नास्ति। पूर्वं तु संस्कृतं जनभाषा आसीत् अस्य प्रमाणमपि साहित्ये उपलभ्यते। मुख्यातिथिः वाग्मीवर्यः उक्तवान् यत् वर्तमानसमये संस्कृतं पठित्वा केवलं पाण्डित्यकर्म नापितु मादृशः प्राध्यापकोऽपि भवितुं शक्नुवन्ति भवन्तः सर्वे । तथैव संस्कृतं पठित्वा अनुवादकः, वार्ताप्रसारकः, भाषाविशेषज्ञः, शिक्षकः, वैज्ञानिको वा भवितुं शक्नुवन्ति । संस्कृते तु ज्ञानस्य अपारनिधिः वर्तते , केवलं तेषां प्रकाशनबुद्धिः आवश्यकी वर्तते। सारस्वतातिथिः डॉ विश्वजित् महोदयेन उक्तं यत् सम्प्रति तु नासावैज्ञानिकैरपि संस्कृतस्य ज्ञानपरम्पराविषये शोधं कुर्वन्तः सन्ति। संस्कृते तु यादृशी वैज्ञानिकता अस्ति , तादृशी वैज्ञानिकता अन्यभाषासु नास्ति । अस्यां भाषायां यल्लिख्यणे तथैव उच्यते किन्तु अन्यासु भाषासु प्रायः एवं नास्ति यथा - रामः गृहं गच्छति, रामः गच्छति गृहम्, गृहं रामः गच्छति, गृहं गच्छति रामः, गच्छति रामः गृहम्, गच्छति गृहं रामः च ; एतानि सर्वाण्यपि वाक्यानि शुद्धानि सन्ति । एवं न कस्यामपि भाषायां परिलक्षते । अध्यक्षीयोद्बोधने श्रीमान् प्रकाशमहोदयेन उक्तं यत् संस्कृतं पठित्वा सम्यक् संस्कारः आगच्छति, संस्कृतेः ज्ञानं भवति इति। तदनन्तरं प्रशिक्षकः मिश्रमहोदयः बालान् परिचयः कथं दातव्यः? इति सरलरीत्या पाठितवान् । सम्भाषणकक्षायां षड् त्रिंशत् छात्राः उपस्थिताः आसन्। सम्प्रति एव गोपालकृष्णमहोदयः बिहारप्रान्तगणे सोशलमीडियाप्रमुखरूपेण नियुक्तोऽभवत्।

# उज्जयिन्यां देवीपूजनपाठविधान-प्रशिक्षणस्य समारोपः

(वार्तासंयोजकः- डॉ.दिनेश चौबे )

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिक-विश्वविद्यालयस्य संस्कृतशिक्षणप्रशिक्षणज्ञान विज्ञानसंवर्धनकेंद्रस्य तत्त्वावधाने आभाषीयपटलमाध्यमेन (आनलाईन् )आयोज्यमानस्य देवीपूजनपाठविधानप्रशिक्षणस्य समारोपः वैक्रमाब्दः २०८०वैशाखशुक्लनवम्यां शनिवासरे तदनु २९/४/२०२३ तमेदिनाङ्के, शनिवासरे सञ्जातः। प्रशिक्षणमिदम् एकदिनाङ्कादारभ्य ऊनत्रिंशत् दिनाङ्कपर्यन्तं प्राचलत्। अत्रप्रशिक्षणे देवीपूजनपाठविधानमंत्रस्त्रोत्रादि-विषये सरलतया प्रशिक्षणं प्रदत्तम् । देशस्य विदेशस्य च् नैकाः धर्मजिज्ञासवः सोत्साहेन अस्मिन्प्रशिक्षणे भागं गृहीतवन्तः। विश्वविद्यालयस्य माननीयकुलपतिः आचार्यविजयकुमारसीजीवर्यस्य कुशलनिर्देशने विश्वविद्यालयस्य केन्द्रेण अस्य प्रशिक्षणस्यामायोजनम् अकारि।

सम्पूर्तिकार्यक्रमे मुख्यवक्तृरुपेण वेदव्याकरणविभागाध्यक्षः, प्रभारिनिदेशकः संस्कृतसंवर्धन केन्द्रम् डॉ. अखिलेशकुमारद्विवेदिमहोदयः उपस्थितः आसीत् । महोदयेन स्ववक्तव्ये श्रीमद्देवीभागवते देवीपूजनस्य नैकान् प्रयोगिकानपक्षान् वैज्ञानिकं महत्त्वञ्च प्रतिपादितं सारगर्भितं व्याख्यानश्च अकरोत्। कार्यक्रमस्य शुभारम्भः वैदिकमङ्गलाचरणेन जातः। तदनु अतिथीनां जिज्ञासूनाञ्च स्वागतं कार्यक्रमस्य प्रतिवेदनं च प्रस्तुतम्। अस्मिन्प्रशिक्षणकार्यक्रमे वेदविभागस्याध्यापकेन श्रीप्रणवकश्यपमहोदयेन प्रशिक्षकरुपेण प्रशिक्षणं दत्तम्। डॉ.अखिलेशकुमारपाण्डेयः, श्रीअनुरुद्धकुमारत्रिपाठी, श्रीशिवानन्दमिश्रः, डॉ.अखिलेशकुमारद्विवेदि महोदयानाम् अस्मिन्प्रशिक्षणे विशिष्टव्याख्यानानि जातानि। समारोहस्य सञ्चालनम् कार्यक्रमसंयोजकेन डॉ.दिनेश चौबेमहोदयेन ,आभारप्रदर्शनं डॉ अङ्कितशाण्डिल्यवर्येण च कृतम्। कार्यक्रमे अनेके जिज्ञासवः समुपस्थिताः आसन्।कल्याणमन्त्रेण सह कार्यक्रमस्य समापनं जातम्।

# “सङ्गणकमाध्यमेन संस्कृतकक्षा योजना”

दीनदयालशुक्लः

वाराणसी। उत्तरप्रदेशसंस्कृतसंस्थानद्वारा “सङ्गगणकमाध्यमेन संस्कृतकक्षा” योजना आरब्धा। उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊ द्वारा संस्कृतमवलम्ब्य विविधप्रकल्पाः तथा नानाविधयोजनाश्च निखिलप्रदेशे अनवरतं सञ्चाल्यन्ते। आसु प्रचल्यमाणासु सर्वासु योजनासु “सङ्गगणकमाध्यमेन संस्कृतकक्षा” इति अद्वितीया अनुत्तमा योजना च वर्त्तते । वस्तुतः इदानींतनयुगः आधुनिकतापूर्णः डिजिटल् तथा वैज्ञानिकः वर्त्तते । उद्देश्यमिदमुपलक्ष्य संस्थानस्य उच्चाधिकारिभिः योजनेऽयं सम्प्रति सम्पूर्णोत्तरप्रदेशे






क्रियान्वयनं जातमस्ति। अप्रैलमासस्य पञ्चदशदिनाङ्कतः विभिन्नेषु जनपदेषु प्रशिक्षिकैः अमीषां कक्ष्याणाम् उद्घाटनं कृतम्। तेषु जनपदेषु काश्यामपि (वाराणस्यां) सुन्दरपुरस्थित ‘वेदमूर्ति-विश्वनाथदेव-गुरुकुले’ तत्रत्य प्राचार्यः आचार्य टीकारामरिजालमहोदयस्य संयोजकत्वेन तथा प्रशिक्षिका ट्विंकलमोहान्ति द्वारा कक्षायाः उद्घाटनकार्यक्रमोऽभवत्। आधुनिक-विश्वस्य उद्देश्यस्य अनुगुणमेव आधुनिकानां छात्राणां ज्ञानाभिवृद्धये, संस्कृतस्य अध्ययनम्प्रति तेषाम् अभिरुचिवर्धनाय अभिप्रेरणायै च विविधाः उपायाः प्रकल्पिताः सन्ति। तस्मिन्नेव क्रमे प्रशिक्षिकया सञ्योजकेन अस्मिन् गुरुकुले उद्घाटनं कृतमासीत्। उद्घाटनसत्रमिदं गुरुकुले स्थित सङ्गोष्ठीप्रकोष्ठे सञ्जातम्। अस्मिन् सत्रे गुरुकुलस्य आदरणीयप्राचार्यमहोदयः आचार्यटीकारामरिजालमहोदयः मुख्यातिथित्वेन समुपस्थितः आसीत्। स्वीयोद्बोधने तेनोक्तं यत् अधुना देशे छात्राणां कृते संगणकस्य संस्कृताध्ययने महदुपयोगः वर्त्तते। तेन कथितं यत् संस्कृतवाङ्मये निहिताः ज्ञान- विज्ञान - अध्यात्म - नाट्य - संगीत- नृत्-योग-आयुर्वेद-चित्रकला-मूर्तिकला प्रभृतिभिः भूरि विषयैः साकं दैनिकजीवनेन सह संस्कृतस्य दृढीयान् सम्बन्धो वर्तते । समापनसत्रे प्रशिक्षकेन कथितं यत् अस्माकं प्राचीन-विद्वत्-प्रवरैः ऋषि-मुनिभिः विरचितस्य विपुल-वाङ्मयस्य संरक्षणाय चापि विचार-विमर्श-पूर्वकं विचर्च्य एषः कार्यक्रमः प्रशासनेतर-विद्यालयेषु संस्कृत-भाषायाः संवर्धनार्थं विभिन्नमाध्यमेन बलवत्तरं सहयोगं प्रदाय समेषां मार्ग-प्रशस्ती-करणम् अपि भविष्यति। संस्कृतभाषा प्रणीतानां वेद, वेदाङ्ग, उपनिषद्, ब्राह्मण, आरण्यक, धर्मशास्त्र, पुराण, इतिहास, दर्शन, योग, आयुर्वेद, शिल्प, वास्तुशास्त्र, अर्थशास्त्र, खगोल, भूगोल चेत्यादि-विषयाः अपि तत्र प्रदर्शिताः सन्ति। गुरुकुलेऽस्मिन् प्रथमकक्षातः द्वादशकक्षापर्यन्तम् छात्राः नैकेषु स्थानेषु विविधेषु प्रदेशेषु चागत्य अत्र गुरुशिष्यपद्धतिमनुसरन्तः विविधविषयान् पठन्ति। प्रधानाचार्य-महोदयः छत्रेभ्यः संस्कृतक्षेत्रे संगणकस्य महत्वविषये अपि उद्बोधितवान् । विंशत्युत्तर-द्वि-सहस्र-तम-वर्षस्य नूतन-शिक्षानीतेः आधारेण संस्कृते किन्नु विद्यते इति विषये नैजं वैदुष्यपूर्णम् वक्तव्यं प्रदाय छात्रान् अभिप्रेरितवान्। उद्घाटनकार्यक्रमे अस्मिन् प्रशिक्षिका ट्विंकलमोहान्ति, नित्यकुमारः, भार्गवः, प्रयागमिश्रः, आयुषः, दुर्गेशसहित त्रिंशत् छात्राः तथा गुरुकुलस्य आचार्याः आङ्लविषयस्याध्यापिका तथा अन्ये कर्मचारिणः अपि सम्भूय कार्यक्रमस्य साक्षिभूताः समभवन्।

# ‘अग्निशामकसप्ताह समारोहः’

- सौरभः दे

एनटीपीसी दार्लिपाली, ओडिशा। ‘अग्निरोधसप्ताहस्य’ अवसरे छात्राः १८ मार्च २०२३ दिनाङ्के बाल भारती पब्लिक स्कूल एनटीपीसी दार्लिपाली इत्यत्र अग्निसुरक्षायाः गुणान्




ज्ञातवन्तः।

‘अग्निशामक सप्ताह’ अवसरे निरीक्षक अभयकुमारसिंहस्य नेतृत्वे सीआईएसएफ एनटीपीसी अग्निशामकदलस्य सदस्यैः विद्यालयस्य छात्रान् अग्निशामकस्य साहाय्येन अग्निसुरक्षाकौशलं शिक्षितम्। अस्मिन् अवसरे CISF अग्निशामकदलेन ‘PPT’ अपि प्रस्तुतं कृत्वा छात्राणां कृते ‘चित्रकला’, ‘निबन्धलेखनम्’ च प्रतियोगितायाः आयोजनं कृतम्। अस्मिन् अवसरे स्वसम्बोधने विद्यालयस्य आदरणीय प्राचार्यः सूर्यनारायणमोहन्ती महोदयः अग्निसुरक्षायाः उपयोगी साधनानि पद्धत्याश्च ज्ञानं दत्तवन्तः।

# संस्कृतभाषायाः प्रासंगिकता सम्प्रति जीवने सर्वत्र वर्तते-डॉ० रत्नेशकुमारत्रिवेदी

लखनऊ। उत्तरप्रदेशसंस्कृतसंस्थानेन संचालिता २० दिवसीया संस्कृतभाषाशिक्षण कक्षायाः बौद्धिकसत्रस्य कार्यक्रमस्य शुभारम्भः केतनकुमारमहोदयेन वैदिकमङ्गलाचरणं गीत्वा कृतः। अतिथिनां परिचयः कार्यशालायाः वृत्तकथनञ्च संस्थानस्य प्रशिक्षकः तथा सत्रसंयोजकः दीनदयालशुक्लमहोदयेन कथयित्वा संस्थानस्य रूपरेखां व्यक्ततीकुर्वन् तेनोक्तम् यत् संस्थानस्य स्थापना ३१ दिसम्बर १९७६ तमे वर्षे अभवत्, तावत् एव एतत् संस्थानं संस्कृतभाषां प्रति निरन्तरं प्रयासरतं भूत्वा विभिन्नमाध्यमैः संस्कृतवाग्व्यवहारकार्यशालया, आनलाइन संस्कृतभाषाशिक्षणेन तथा च अनेकैः सांस्कृतिकैः आयोजनैः संस्कृतभाषायाः विकासे निरंतर



प्रयत्नशीलमस्ति। प्रतिमासे ३ तः ४ सहस्र पर्यंतं छात्राः अत्र संस्कृतभाषायाः शिक्षणं कुर्वन्ति। अथ च उत्तरप्रदेशस्य ७५ जनपदेषु योगप्रशिक्षणकार्यशालायाः संचालनम् अपि प्रचलति। बौद्धिकसत्रस्य कार्यक्रमे मुख्यवक्तृत्वेन समुपस्थितः संस्कृतभारत्याः चित्रकूटविभागसंयोजकः तथा श्रीवामदेवसंस्कृतमहाविद्यालयस्य व्याकरणविभागाध्यक्षः च श्री डॉ0रत्नेशकुमारत्रिवेदीमहोदयेन आधुनिकसमये संस्कृतभाषायाः उपादेयताविषये प्रकाशितः। संस्कृतभाषा भारतस्य आत्मा अस्ति, यदि भारतस्य विषये ज्ञातुम् इच्छति चेत् वयं संस्कृत भाषायाः शिक्षणम् अवश्यमेव कुर्यामहि, संस्कृतज्ञानेन विना भारतस्य विषये ज्ञातुं न शक्नुमः कस्यचित् लक्ष्यस्य प्राप्तिः सङ्घटने स्थित्वा एव भवितुं अर्हति अतः सर्वान् सङ्घटितो भूत्वा कार्यं करणीयमिति, यथा वेदे अपि कथ्यते यत् ष्एकोऽहं बहु स्याम्’ इति। अस्मिन् कार्यक्रमे उत्तरप्रदेशसंस्कृतसंस्थानस्य प्रशिक्षणप्रमुखः सुधीष्ठमिश्रमहोदयः, निदेशकः विनयश्रीवास्तवः, प्राशासनिकाधिकारी डॉ0 दिनेशमिश्रः, सर्वेक्षिका डॉ0 चन्द्रकला शाक्या, प्रशिक्षणसमन्वयकः धीरजमैठाणीमहोदयानां तथा दिव्यरञ्जनवर्यः राधाशर्ममहोदयायाश्च सानिध्यं प्राप्य सर्वे कृतार्थाः अभवन्। संस्कृतभाषाशिक्षणकार्यशालायां प्रतिभागगृहीताः प्रतिभागीभिः स्वीयम् अनुभवकथनम्, लघुकथा, संस्कृतगीतानि प्रस्तुतवन्तः। कार्यक्रमस्य सञ्चालनं प्रशिक्षुः तथा मुरादाबादजनपदस्य परिषदीयविद्यालयस्य शिक्षकः डॉ0 मुकुलकौशिकमहोदयः कृतवान्। डॉ0 राजीकुमारझाः धन्यवादज्ञापनं तथा शान्तिमन्त्रः अनिलमहोदयेन कृतः। अस्मिन् अवसरे संस्थानस्य समस्त प्रशिक्षकाः अधिकारिगणः तथा ऑनलाइन माध्यमेन सञ्चालितायाम् अमुष्यां कक्ष्यायाम् अधीयमाणाः भारतस्य विविधस्थानेभ्यः कुमुदसिंहः, शैलेन्द्रशर्मा, अवकेशकुमारः, दिव्यासाहनी, पूजा, कुलदीपशर्मासहित नैके सामाजिकाश्चोपस्थितः आसन्। वन्देसंस्कृतमातरम्।।

प्रथमपुटस्य शेषभागः

## पतंजलौ ‘उन्नत रीत्या सह आयुर्वेदमाध्यमेन...



जयपुर, राजस्थानस्य डॉयरेक्टर प्रो. (डॉ. )अनुराग श्रीवास्तवः अवोचत् आयुर्वेदः अस्मभ्यं जीवन पद्धतिपरतया नयति। पतंजलि औषधि एवं आयुर्वेदिक धाराणां संगमः। सम्मेलने आयुर्वेद, गुरुग्राम के वरिष्ठ सलाहकार डॉ. परमेश्वर अरोड़ा ‘वैदिक वे ऑफ ड्रिंकिंग वाटर’; सफदरजंग चिकित्सालय, दिल्ली इत्यस्य भूतपूर्वः मुख्यः ब्रेस्ट/एंडोक्राइन यूनिट, हेड सर्जरी प्रो चिंतामणिः ‘समग्र स्वास्थ्य-द कार्पे डायम स्पिरिट’; अखिल भारतीय आयुर्विज्ञान संस्थानं, ऋषिकेशः, उत्तराखंडस्य आयुष विभागस्य अध्यक्षा प्रो. वर्तिका सक्सेना देशे स्थूलताविषये समग्र दृष्टिकोणं’; आयुष मंत्रालय, उड़ीसा सर्वकारस्य एम्पावर्ड परिषदः अध्यक्ष प्रो- गोपाल सी- नंदा ‘लॉजिकल इंटरवेंशन ऑफ मॉडर्न टेक्नोलॉजी विद होलिस्टिक सिस्टम ऑफ मेडिसिन-ए सिम्बायोटिक अप्रोच’ ; आईएएसटीएएम इत्यस्य पूर्व अध्यक्षः डॉ- नरेन्द्र भट्टः ‘आयुर्वेदिक सिद्धांतेभ्यः उन्नत तकनीक्याः अनुकूलन हेतुः समाधानविषये व्याख्यानं दत्तवान् ।ततः पूर्वं पतंजलि विश्वविद्यालयस्य प्रति-कुलपतिः प्रो. महावीर अग्रवालः अतिथिगणं स्वागतीकृतवान्। कार्यक्रमस्य सफलं संचालनं पतंजलि अनुसंधान संस्थानय हर्बल रिसर्च डिविजन इत्यस्य प्रमुखः डॉ. वेदप्रिया आर्या अकरोत्। अस्मिन् अवसरे पतंजलि अनुसंधान संस्थानस्य प्रमुखः वैज्ञानिकः डॉ. अनुराग वार्ष्णेयः, डी.जी. एम. ऑपरेशन श्री प्रदीप नैनः, पतंजलि विश्वविद्यालय कुलसचिवः डॉ. प्रवीण पुनिया, पतंजलि आयुर्वेद कॉलेज प्राचार्यः प्रो. अनिल यादवः, पीआरआई के वरिष्ठः वैज्ञानिकः डॉ. अनुपम श्रीवास्तवः इत्येभिः सहिताः पतंजलि आयुर्वेद कॉलेज तथा च पतंजलि विश्वविद्यालयस्य च छात्राः समुपस्थिताः आसन् ।

# शारीरकविमर्शविषयिणी राष्ट्रिया संगोष्ठी सुसम्पन्ना

डॉ. लक्ष्मीकान्तविमलः, नवदेहली

नवदेहलीस्थितेन श्रीशंकरशिक्षायतनवैदिकशोधसंस्थानेन ब्रह्मविज्ञानविमर्श-शृंखलायां अप्रैलमासस्य ऊनत्रिंशत्तमे दिनाङ्के शारीरकविमर्शविषयिणी अन्तर्जालीया राष्ट्रीया संगोष्ठी सुसंपन्नतां गता। संगोष्ठीयं पण्डित-मधुसूदन-ओझा-प्रणीतं शारीरकविमर्शनामकं ग्रन्थमधिकृत्य समायोजिताऽऽसीत्। अस्यां संगोष्ठ्यां नवदेहलीस्थितस्य भारतीयदार्शनिकानुसन्धानपरिषद: सदस्यसचिवा: प्रो. सच्चिदानन्दमिश्रमहोदया: मुख्यवक्तृरूपेण तथा च पुणे-नगरस्थितस्य सावित्रीबाई-फुले-पुणे-विश्वविद्यालयस्य संस्कृत-प्राकृत-भाषा-विभागाध्यक्षा: प्रो. देवनाथत्रिपाठिवर्या: विशिष्टवक्तृरूपेण व्याख्यानं प्रस्तुतवन्त:। कार्यक्रमोऽयं श्रीशंकरशिक्षायतनस्य समन्वयकानामथ च



जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृतप्राच्यविद्याध्ययनसंस्थानस्य आचार्याणां प्रो. सन्तोषकुमारशुक्लमहाभागा-नामाध्यक्ष्ये परिपूर्णोऽभूत्।

पण्डितमधुसूदनओझावर्यैः प्रणीतायां ब्रह्मविज्ञानग्रन्थशृङ्खलायां शारीरकविमर्शनामक: दर्शनशास्त्रविषयक: ग्रन्थ: महत्त्वपूर्णतम: विद्यतेतराम्। ग्रन्थेऽस्मिन् दार्शनिकान्यन्यानि विषयाणि उत आत्मन: विविधानि पक्षाणि विस्तरेण विलसन्तितराम्। 'शारीरक' इति पदस्य अर्थ: जीवो भवति। जीव एव जीवात्मा उच्यते।

अस्यां संगोष्ठ्यां प्रो. सच्चिदानन्दमिश्रमहाभागा: स्वकीये वक्तव्ये शारीरकविमर्शस्य नवमे प्रकरणे प्रतिपादिते दर्शनशास्त्रस्य वर्गीकरणस्य संगतिं प्रदर्शयन्त: कथितवन्त: यत् पं. ओझामहोदयै: दर्शनशास्त्रस्य त्रिधा विभाग: कृत:। दर्शनशास्त्रस्य प्रथमविभागे षट् दर्शनानि, द्वितीये विभागे अष्टादश दर्शनानि, तृतीये विभागे च षट्त्रिंशत् दर्शनानि विद्यन्ते। तै: प्रतिपादितं यत् ओझामहोदयानां दर्शनशास्त्रस्य वर्गीकरणोऽयं सर्वथा नवीन: मौलिकश्च। प्रकरणोऽयं दर्शनशास्त्रस्य अध्येतृ: निश्चप्रचमुपादेयो वर्तते।

प्रो. देवनाथत्रिपाठिवर्या: शारीरकविमर्शस्य द्वितीयं प्रकरणमधिकृत्य शब्दब्रह्मण: शास्त्रब्रह्मणश्च व्याख्यानं प्रस्तुतवन्त:। तै: उक्तं यत् शब्दब्रह्म तु सृष्टे: मूलकारणमस्ति। तस्य मूलकारणस्य प्रतिपादकं शास्त्रं शास्त्रब्रह्म। द्वयोर्मध्ये प्रतिपाद्यप्रतिपादक: संबन्ध: स्वीकर्तव्य:।

अध्यक्षीये उद्बोधने शारीरकविमर्शस्य षोडश प्रकरणानां सारांशं प्रस्तुवन्त: प्रो. सन्तोषकुमारशुक्लमहाभागा: अवोचन् यद् ग्रन्थोऽयं दर्शनशास्त्रस्य उत्तम: ग्रन्थ:। अस्य ग्रन्थस्य प्रत्येकं प्रकरणमधिकृत्य प्रत्येकं प्रकरणेषु एका विमर्शात्मिका लघुपुस्तिका अवश्यमेव प्रकाशितव्या। यतो हि ग्रन्थस्यास्य समग्रेऽपि प्रकरणे नैकानि महत्त्वपूर्णानि विषयाणि समाहितानि सन्ति। तै: प्रतिपादितं यत् ग्रन्थोऽयं षोडश प्रकरणे विभक्तो वर्तते। यस्य सिंहावलोकनम् अनेन प्रकारेण कर्तुं शक्यते-ब्रह्ममीमांसा-प्रवृत्तिनिमित्त-नामके प्रथमे प्रकरणे ब्रह्मण: जिज्ञासा विहिता अस्ति, शास्त्रब्रह्म-मीमांसा-नामके द्वितीये प्रकरणे षट् विषयाणि सन्ति। अत्र कारणरूपेण शब्दब्रह्मण: वर्णनम् अस्ति। कारणब्रह्मण: प्रतिपादकं शास्त्रब्रह्म अस्ति। वेदतत्त्वनिरुक्तिनामके तृतीये प्रकरणे पञ्चदश उपविषया समाहिता: सन्ति। वेदतत्त्वात् इयं सृष्टि: सञ्जायते। अस्यां सृष्टौ य: आकार अस्ति स ऋगतत्त्वात्, या गति: अस्ति सा यजुस्तत्त्वात्, यत् तेज: तत् सामतत्त्वात्, विश्वस्य या संरचना सा अथर्वतत्त्वात् जायते। यथोक्तं तैतिरीये ब्राह्मणे–

ऋग्भ्यो जातां सर्वशो मूर्तिमाहु: सर्वा गतिर्याजुषी हैव शश्वत्।
सर्वं तेज: सामरूपं ह शश्वत् सर्वं हीदं ब्रह्मणा हैव सृष्टम्॥

वेद-संस्था-भेदाध्यायिनाम् औपाधिक-संज्ञा-भेदा: इति चतुर्थे प्रकरणे पञ्च विद्यानां विश्लेषणं विद्यते। ते सन्ति- मन्त्रविद्या: अक्षरविद्या: दृष्टिविद्या: यज्ञविद्या: सिद्धविद्याश्च। वेदशाखाविभागनामके पञ्चमे प्रकरणे द्वादश विषया: संकलिता: सन्ति। अस्मिन् प्रकरणे वैदिकविज्ञानदृष्ट्या गणनाया: विषय: अस्ति। शून्यसंख्याया: पूर्णसंख्यायाश्च वर्णनम् अस्ति। वैदिकविज्ञाने ऋततत्त्वं सत्यतत्त्वञ्चेति द्वे तत्त्वे स्त:। ऋततत्त्वेन शून्यस्य सत्यशब्देन पूर्णस्य च बोधो भवति। शब्दमयवेदनिरुक्तिनामके षष्ठे प्रकरणे वेदशास्त्रस्य, उपनिषच्छास्त्रस्य, दर्शनशास्त्रस्य, मीमांसाशास्त्रस्य, गीताशास्त्रस्य च विस्तारेण व्याख्यानम् अस्ति। शब्दमयवेदानां पौरुषेयत्वापौरुषेयत्वविमर्शे नानामतसमुच्चय-नामके सप्तमे प्रकरणे द्विचत्वारिंशत् सिद्धान्तानि समिक्षितानि सन्ति। अत्र पाश्चात्यदेशीय: मैक्समूलरमहोदयस्य विचार: अपि सन्निहित: अस्ति। उपनिषच्छास्त्रनिरुक्तिनामके अष्टमे प्रकरणे षट् विषया: सुगुम्फिता: सन्ति। उपनिषद: कति विभागा: सन्ति, कस्योपनिषद: केन वेदेन सह संबन्ध: विद्यते इति विषयस्य विचार: अत्र दृश्यते। दर्शनशास्त्रनिरुक्तिनामके नवमे प्रकरणे दर्शनशास्त्रस्य षोढा विभाग:, अष्टादशधा विभाग:, षट्त्रिंशत्तमो विभाग: कृतोऽस्ति। षोडशपदीय-पदार्थ-निरुक्तिनामके दशमे प्रकरणे निरूढशब्दपाद:, विशेषणशब्दपाद:, पराश्रयशब्दपाद:, प्रधानशब्दपाद:, आक्षेपपादश्चेति नैके विषया: समाहितास्सन्ति। गीताशास्त्रनिरुक्तिनामके एकादशतमे प्रकरणे संक्षेपेण अक्षरपुरुषस्य उत्तमपुरुषस्य च विचार: समुपलभ्यते। आत्ममीमांसानामके द्वादशतमे प्रकरणे आत्मन: विविधानि स्वरूपाणि वर्णितानि सन्ति। तेषु केवलात्मा, ईश्वरात्मा, जीवात्मा चेति त्रीणि आत्मस्वरूपाणि विवेचितानि सन्ति। केवलात्मा निर्विशेषशब्देन तथा च परात्परशब्देन व्याख्यायते अयम् आत्मा विशुद्धाव्यय:। ईश्वरात्मा विश्वशरीरेण, पुरुषरूपेण, ईश्वररूपेण प्रसिद्ध: तस्यैव नाम ईश्वराव्यय:। जीवात्मा एव विश्वेश्वरपुरुष: अस्ति, अयम् आत्मा जीवाव्यय: अस्ति। उपनिषच्छास्त्राणां विरोधाभासनिरासो ब्रह्ममीमांसानामके त्रयोदशतमे प्रकरणे एते प्रधानविषया: निरूपिता: सन्ति- निर्विशेष:, परात्पर:, पुरुष:, सत्य:, यज्ञ:, विराट्, विश्वश्चेति। दर्शनशास्त्राणां विरोधाभासनिरासो ब्रह्ममीमांसानामके चतुर्दशतमे प्रकरणे १० उपशीर्षका: सन्ति। यत्र दर्शनशास्त्रस्य विषयस्य परस्परविरोधस्य परिहार: युक्तियुक्त्या कृत: अस्ति। ईश्वरात्मा-निरुक्तिनामके पञ्चदशतमे प्रकरणे ब्रह्मण: चतुष्पाद: वर्णिता: सन्ति। परात्पर: पुरुष: पुरम् विकारश्चेति चत्वार: ब्रह्मण: चतुष्पाद्रूपेण समुपलभ्यते। जीवात्मप्रतिपत्तिनामके षडशतमे प्रकरणे चिदात्मा चिदंश: चिदाभास: इत्यादय: विविधविषया: उद्घाटिता: सन्ति।

संगोष्ठ्यारम्भे श्रीलाल- बहादुर- शास्त्रि- राष्ट्रिय- संस्कृत- विश्वविद्यालयस्य वेदविभागीय: शोधच्छात्र: श्रीप्रवीणकोईराला वैदिकमङ्गलाचरणं कृतवान्। कार्यक्रमस्य संपूर्णता वैदिकेन शान्तिपाठेन सञ्जाता। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य शोधाधिकारी डॉ.लक्ष्मीकान्तविमल: कृतवान् धन्यवादज्ञापनञ्च डॉ.मणिशंकरद्विवेदिना कृतम्। देशस्य विविधेभ्य: विश्वविद्यालयेभ्य: महाविद्यालयेभ्य: अन्येभ्य: शैक्षणीकसंस्थानेभ्यश्च अनेके विद्वांस: शोधच्छात्रा: सहभागितां कृत्वा कार्यक्रमस्य साफल्ये योगदानं कृतवन्त:।

# एकादशी-श्रीमद्भगवद्गीता राष्ट्रिय-व्याख्यानगोष्ठ्या: नवम: पर्याय: सुसम्पन्न:

वृत्तप्रेषिका- डॉ. नेहा मिश्रा

महर्षिपाणिनिसंस्कृत-एवं वैदिकविश्वविद्यालय:, उज्जैन-मध्यप्रदेश:, राजकीय-स्नातकोत्तर-महाविद्यालय:, चरखारी-महोबा, चातुर्वेद-संस्कृतप्रचार- संस्थानम्, काशी, उत्तरप्रदेश:, इत्येतेषां संयुक्तायोजने

वर्चुवल-पाक्षिक-राष्ट्रिय-व्याख्यानगोष्ठ्या: नवम: पर्याय: सफलतया सम्पन्ना अभूत्।

अत्र मुख्यवक्तारूपेण प्रो.भगवत शरणशुक्ल: आचार्योऽध्यक्षचर: व्याकरणविभाग:, काशीहिन्दूविश्वविद्यालय:, वाराणसीत: आसीत्। श्रीमद्भगवद्गीतायाम् अनुशासनम् इत्यस्मिन् विषये प्रबोधितवन्त: यत् गीता अनुशासनविषये अत्यन्तं गभीरं चिन्तनं प्रस्तौति। जीवने अनुशासनस्य महत्वपूर्णं स्थानमस्ति। प्राकृतिकम्, आधिकारिकम्, वैयक्तिकम्, सामाजिकञ्चेति अनुशासनस्य चत्वार: प्रकारा: सन्ति। तैरुक्तं यत् पञ्चभूततत्वानुरूपम् आचरणं प्राकृतिकानुशासनं कथ्यते। निद्रा, बुभुक्षा, जागरणादिकम् प्राकृतिकमस्ति। अत्र प्रेरणा विनैव प्रवृत्तिर्जायते। गीता कथयति: सर्वं प्रकृतिजैर्गुणै:, अत: नियतं कुरु कर्मत्वम्। द्वितीयम् आधिकारिकमनुशासनम्। एतच्च परिवार-नगर-राज्य-राष्ट्रादिप्रमुखाणां नियमानुसारम् आचरणं कथ्यते। अत्र योगस्थ: कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय। अपि च सिद्ध्यसिद्ध्यो: समोभूत्वा समत्वं योग उच्यते, इतिवत् आचारणमनुशासनं भवति। तृतीयमस्ति वैयक्तिकमनुशासनम्। अत्र विचारवान् विज्ञो जन: स्वस्य अनुशासनं निर्मीय जीवति। एनं गीता स्थितप्रज्ञ:, इति वदति। एतादृशो जन: परोपकारी, सदाचारी च भवति। समाजे आदर्शं स्थापयति। अन्तिम: प्रकार: सामाजिकानुशासनस्यास्ति। एतदनुशासनं दमनात्मकं, प्रभावात्मकं, मुक्त्यात्मकञ्चेति त्रिविधं भवति। अत्र समाजद्वारा, राष्ट्रद्वारा प्रदत्तं निर्धारितं वा आचरणम् अनुसरणीयं भवति। सर्वेषां जीवने महन्महत्वमस्ति। इत्थं गीतोक्तम् अनुशासनम् अत्यन्तं गभीरतया प्रतिपादितवान्।

विशिष्टवक्त्रीरूपेण प्रोफेसर नीलिमा पाठक सङ्कायाध्यक्षा, मानविकी एवं भाषाशास्त्रम्, यौगिक साइंस तथा नैचुरोपैथी सरला बिरला विश्वविद्यालय:, रांची झारखण्डत: आसीत्। महोदया श्रीमद्भगवद्गीतायाम् चतु:सूत्री...कर्मण्येवाधिकारस्ते..., इत्यस्मिन् विषये ज्ञानवर्धकं व्याख्यानं कृतवती। उक्तवती यद् गीता प्रवृत्तिप्रधानो ग्रन्थो वर्तते। प्रवृत्तिर्नाम कर्म। एतत् कर्म श्रौतस्मार्तकर्मापेक्षया व्यापकमस्ति। जीवनस्य क्रिया ज्ञानमयी, कर्ममयी, प्रेममयी भवेत्। महोदया बोधितवती यत् विना कर्म कश्चिदपि स्थातुं न शक्नोति। गीताया: कर्मण्येवाधिकारस्ते चतु:सूत्रीत्वेन विद्वांस: प्रतिपादयन्ति। तत्र कर्म, कर्मफलं, निष्कामकर्म, कर्मण: अनिवार्यतेति।




सभाध्यक्ष: प्रो. विजय कुमार सी. जी. कुलपति: महर्षिपाणिनिसंस्कृत एवं वैदिक विश्वविद्यालय:, उज्जैन मध्यप्रदेशत: आसीत्। महोदय: कार्यक्रमस्य सारमुपस्थापयन् अकथयत् यत् गीता सर्वेषां कृते सर्वास्वस्थासु स्वीकार्यो वर्तते। स्वकर्मनिरतो जन: सिद्धिं लभते। सभाध्यक्षमहोदयस्य विश्वास: अस्ति यत् अनया गोष्ठ्या:, गीताव्याख्यानेन नूनमेव समाजे नवप्रेरणाया:, जागरुकताया:, सत्पथाचरणस्य च सन्देश: प्रसरिष्यति।

आयोजकपक्षत: गोष्ठ्याम् आदौ श्रीमान् प्रणवकश्यप: वैदिकं मङ्गलाचरणं कृतवान्। तत:

समन्वयक: डॉ तुलसीदासपरौहा महोदय: प्रस्तावनापुरस्सरं स्वागतभाषणं प्रास्तौत्।

गीताश्लोकपाठम् अकरोत् गोरक्षपुरत: डॉ.प्राङ्गेश कुमार मिश्र:। आयुष्मान् शिवम उपाध्याय: बोकारो झारखण्डत:।

डॉ आभा द्विवेदी महोदया सहायकाचार्या सिद्धार्थविश्वविद्यालय:, सिद्धार्थनगरत: अस्य कार्यक्रमस्य सुन्दरतया, सफलतया, सञ्चालनम् अकरोत्। धन्यवाद ज्ञापनं प्रो.उमाशङ्कर त्रिपाठी महोदय: सम्पादितवान्। अस्य कार्यक्रमस्य सूत्रधार:, परिकल्पक:, संयोजकश्च यो वर्तते संस्कृतसमुपासक: डॉ० चन्द्रकान्तदत्तशुक्लवर्य: (असिस्टेन्ट प्रोफेसर, सन्तगणिनाथ राजकीय स्नातकोत्तर- महाविद्यालय- मुहम्मदाबाद-गोहना, मऊ उत्तरप्रदेश: कार्यक्रमस्य अन्ते शुभकामनासन्देशपूर्वकं शान्तिपाठं कृत्वा सभाध्यक्षमहोदयस्य अनुमत्या च कार्यक्रमस्य समापन्नतां घोषितवान्। एतदपि असूचयत् यत् संस्कृतस्य सर्वेषां दैनिक, साप्ताहिक, पाक्षिक समाचारपत्राणामपि योगदानमस्ति।

गोष्ठ्यां प्राचार्य: प्रो. आनन्द गोस्वामी, कवि: डॉ० अरविन्दतिवारी, डॉ अश्विनी पाण्डेय:, डॉ. प्रकाशरञ्जन मिश्र:, डॉ. धनञ्जय मणि त्रिपाठी, डॉ रामप्रतापमिश्र:, डॉ रामकेश्वर तिवारी, डॉ सविता ओझा, डॉ गीता, डॉ अम्बरीषकुमार मिश्र:, प्रो. प्रह्लाद जोशी, प्रो उपेन्द्रकुमार त्रिपाठी, डॉ. नलिनीकान्त मणि त्रिपाठी, डॉ. प्रो. अनीता कुमारी, डॉ. दर्शना सायम्, सुन्दरी, डॉ. राजेशकुमार चौरसिया, डॉ. सुजाता पटेल, उमा जी पाटिल, पुष्पराज शर्मा, राम अचल यादव:, पार्वती पाण्डेया, दीनदयालशुक्ल:, कमलेशसुखवाल:, ललिता सिंहल, अखिलानन्द उपाध्याय:, डॉ.अशोक कुमार:, हेमराज सैनी, अनन्या, महक, अनीता, अङ्किता, प्रियङ्का, रोशन, मो० बेलाल इत्यादयो द्विशतं जिज्ञासव:, विद्वांस:, छात्राश्च प्रतिभागमकुर्वन्। कार्यक्रम: उत्तरोत्तर प्रगतिपथमारोहतीति सर्वेभ्यो धन्यवादा:।

## शशिधररचितकवनमयि धर हृदि



- डॉ-शशिकान्त तिवारी 'शशिधर'

बलिवरसुरवरसकलसुदलबलहतदितिकुलजदनुजदशवदन-
बहुविधमणिमयभवनदहनरतपवनतनयबुधवरसुखसदन!।
जलचरभुविचरपवनगगनचरनरपतिसुरपतिमुनिपतिशरण!
निजसुतशशिधररचितकवनमयि धर कपिवर
निजहृदि प्रभुचरण!।। 01।।

निशिचरपतिशरहतदशरथसुतरघुपतिसहजपवनशिवमुचिर!
जलनिधिनिचरविविधविधबलिपतिनिशिरतदमननिरतभवरुचिर!।
रघुवरविमलचरणशुभभवनसुविहतमदनखलदलबलहरण!
निजसुतशशिधररचितकवनमयि धर कपिवर निजहृदि प्रभुचरण!।।02।।

शृणु मम वचनमयि वितर गुणमतिविमलसरसकविमतिमपि गुणद!।
भवतु कवनमतिप्रथितमिह जगति हरतु सुकविजनमन इह शिवद!
विपदिपतितनिजसुतगतभयमिह हर जहि रिपुदलमयि गुरुचरण!
निजसुतशशिधररचितकवनमयि धर कपिवर निजहृदि प्रभुचरण।।03।।
बुधखलनिशिचरसुतजलधरपतिसहजहननरतबलिवरविदर!
दशमुखभवनविगतभयहृदयसकलरघुवरगुणविवरणनिरत!।
कपिभयरहितवचनरिपुदलमतिचकितहृदयमिह भयमनुभवति
किमिह कठिनमयि शशिधर जगति हि पवनतनयबलत इह न भवति ।। 04।।

जहि जहि खलपतिमिह जहि कपिमयि निशिचरवरदलमिह ननु वदति
रघुपतिभजननिरतमतिगतभयकपिरमन इह मुदमनुभवति।
कनकलसितशिवनगरभवनमयि कपिवरपुरगतमिह बहु दहति
किमिह कठिनमयि शशिधर जगति हि पवनतनयबलत इह न भवति ।।05।।

श्रीजानकीजयन्तीपुण्यावसरे

## श्रीजानकीचरितम्



-मार्कण्डेयो रवीन्द्रः

वैशाखस्य सिते तिथिर्हि नवमी
त्रेतायुगे पावना
यज्ञार्थं खलु शोधिता वसुमती
राजर्षिणा धीमता।
फालेनैव यदा हलस्य जनकः
सीरध्वजः कर्षति
साश्चर्यो नृपतिः प्रजा मुनिजनाः
पश्यन्ति दिव्यं शिशुम् (1)

दिव्यं तं स्तनपं विलोक्य जनकः
सीरध्वजो हर्षितः
कन्येयं तनया नयामि भवने
साक्षी स्वयं शङ्करः।
वैदेही च यतो विदेहतनया
सीता तथा सीतया
कन्या साब्धिसुतेन्दिरावतरणं
नूनं जगद्धेतवे।। (2)

बाल्ये कालगते यदा हि तनया
संवत्सरे पञ्चमे
एकेनैव करेण खण्डपरशो-
रुत्थापितं तद्धनुः।
पुत्री मे वसुधासुता बलवती
राजर्षिणा निश्चितं
भर्ता ते स भविष्यतीति दुहितः
शम्भोः धनुर्भञ्जकः।। (3)

रामो दाशरथी पुराणपुरुषः
श्रीजानकीवल्लभः
सीता गच्छति कानने हि पतिना
रामेण साकं सती।
लङ्केशेन हता निशाचरपती
रामेण वै हन्यते
हेतुर्यातुविनाशने भगवती
नौमि श्रीरामप्रियाम्।। (4)

सीतायाः चरितं पुण्यं
नित्यं पठन्ति ये जनाः।
इहलोके सुखं प्राप्य
प्राणान्ते श्रीपतेः पदम्।। (5)

## नमो गणपतये



(अश्वघाटीछन्दसा)

-महाचार्य्यःमनतोषःभट्टाचार्यः

स्तुत्यानया खलु भजे त्यागिनं विमलमत्याम्बिकाप्रियसुत-
मादाय चक्रमुसलं दानवांश्च समरे दाति यस्सुररिपून्।
वेदादिशास्त्रकुशलं दानवान्तवरदं दानशीलमनिशं
गङ्गाम्बु यच्छति च गङ्गापतिं स्वकरभृङ्गाश्रितं सपदि यः।।१।।

नत्वा सदा गणपतिं त्वामहं ह्यपि च दत्त्वा पदेऽम्बुजदलं
ओं गं गणाधिपतये गं नमोऽस्तु मनुना गन्धगाङ्गसलिलैः।
पूजां करोमि सततं जापकं प्रकुरुतां जालमुक्तमथ मां
स्वस्मै न किञ्च खलु तस्मै ददे न च परस्मै च तत्त्वमसि
मे(स तु मम)।।२।।

वन्दे गणेशमथ सन्देहजं कलिमलन्देहिनो भवतु नो
किम् वापरं गणपते बालिशो ह्ययमहो वाञ्छतीभवदन।
विघ्नेश्वर प्रिय कृतघ्नस्य मे न च खला घ्नन्ति चेद्धि विपदस्-
तान् दोषिणः क इह मां दोक्ष्यति प्रतिदिनं दोषिणं वद विना।।३।।

हस्तैश्चतुर्भिरमलैस्तैर्भवान् धरति शस्त्रैर्गदां सरसिजं
शङ्खं रथाङ्गममलङ्खेलसि त्वमथ शङ्खाभपूर्णशशिना।
दन्तायुधं धरति सन्तापितञ्जनमनन्तं रिरक्षुरभयं
दातुन्तथाखुमपि गन्तुं भवांश्च लभते तुन्दिलाय च नमः।।४।।

व्यासो न्ययुङ्क्त गणपं सोत्सुकस्तु लिखितुं सोऽप्युचे मुनिवरं
यावल्लिखामि न च तावन्मुनेऽस्तु विरतिस्सोऽप्युचेऽस्तु च तथा।
नाभात्यहो भुवि महाभारतं यदि महाभारतं न लिखितं
लम्बोदरेण भजताम्वो नमोऽस्तु मनुना वो मतिर्गणपतौ।।५।।

यं मानुषामरगणामानुषाः प्रविणता मानयन्ति गणपं
सिन्दूरवर्णमनिशन्दूरतो न च नमन्दूषणं कलिमलम्।
कुर्वे लयं ननु विदुर्वेदगं नरगणा वेदमन्त्रकुशलास्-
तं हस्तिमुण्डधरमास्तिक्यधीर्भजति(र्नमति) नास्तिक्यधीर्न भजते (कुरुते)।।६।।

## भगवत्परशुरामस्तुतिसप्तकम्





-डॉ. अरविन्दकुमारतिवारी

मुनिजनमान्य! वदान्य! महीपतिमानद! केवलमानधनं
कलियुगदारुणदानवदग्धमये निखिलं विधिबोधवनम्।
अतुलितदेव! दनुजभयनाशक! विघ्नविनाशक! विश्वसृतम्!
भुवि परशुप्रिय! राम! गुणार्णव! विप्रकुलं परिरक्ष नतम्।। १

श्रुतिरवगानरतं बहुभाषि निरर्गलवाक्यमुखं चपलं
निजकुलमानविमर्दनरक्तमहो बहुभेदविनष्टबलम्।
परहितदक्षमनारतभारतभावनसक्त! विशुद्धमतं
भुवि परशुप्रिय! राम! गुणार्णव! विप्रकुलं परिरक्ष नतम।। २

अभिनवभारतभीत्तिविनिर्मितसंस्कृतसंस्कृतिरागभरं
विकसितपद्मपरागसुगन्धितशुद्धसमेधितमाद्यनरम्।
खलदलदृष्टिनिबद्धमलं विकृतं बहुशः सुकृतैरनिशम्
भुवि परशुप्रिय! राम! गुणार्णव! विप्रकुलं परिरक्ष नतम्।। ३

ऋषिवरबिन्दुविभारचितं नवनीतिहृतं विकलं सदने
बहुबलबुद्धिसमर्जनलब्धधनागमतुष्टमहो भवने।
अभिमतसिद्धिमना हरते मुखरो-मुखरं सुजनं विनतं
भुवि परशुप्रिय! राम! गुणार्णव! विप्रकुलं परिरक्ष नतम्।। ४

अनलमुखं शमशोभितदेहमजेयमितं जितसिद्धकलं
कृपणसमं खलनिन्दितमन्त्रमये भवदैवतनामजलम्।
अरिजनमङ्गलकारमनीप्सितहेतुरतं विमलं सुनृतम्
भुवि परशुप्रिय! राम! गुणार्णव! विप्रकुलं परिरक्ष नतम्।। ५

विजितविचित्रखलेशमहाभटचित्तजपावक! कर्मपते!
विमलसुकीर्तिलतापरिधान! यमाग्रज! पावन! धर्मरते!
कृतरणगर्जनकम्पनपर्वतशेखरखण्डन!लोकगतं
भुवि परशुप्रिय! राम! गुणार्णव! विप्रकुलं परिरक्ष नतम्। ६

श्रुतबहुवैभव! भीषणसायक! मानसवेगविशिष्टकृते!
धृतविधिधर्म! महीरुहरूपक! दिव्यलकपाल! विशालधृते!
नयनटनागरभूसुरवञ्चकतापक!शासकहृन्निहतं
भुवि परशुप्रिय! राम! गुणार्णव! विप्रकुलं परिरक्ष नतम्।। ७

संस्तवसप्तकं सृष्टमरविन्दतिवारिणा।
परशुरामगुरोश्चित्तहृतये-कविना मया।। ८

वैशाखे-सितसत्पक्षे तृतीयायां शनौ द्रुतम्।
रचितं सप्तकं कुर्याद्विप्राणामुदयं शुभम्।। ९

मानदं धर्ममार्गस्थं दुष्टानां मानमर्दकम्।
वन्दे परशुरामं तं यं स्तुवन्ति बुधोत्तमाः।। १०

## ।। लक्ष्मीकान्तं नमाम्यहम् ।।



डॉ.शिवानी शर्मा,
जयन्तनगरम्
(जीन्दनगरम्)
हरियाणाराज्यम्

शान्ताकारं हरिं विष्णुं लक्ष्मीकान्तं नमाम्यहम् ।
भवभयहरं सत्यं मेघवर्णं नमाम्यहम् ।।१।।

जगत्प्रभुं च भर्तारमनन्तं पुरुषोत्तमम् ।
अनादिनिधनं देवं लोकनाथं नमाम्यहम् ।।२।।

योगं च योगिनं कृष्णं प्रधानं पुरुषेश्वरम् ।
नारसिंहवपुर्वीरं श्रीकेशवं नमाम्यहम् ।।३।।

सर्वं शर्वं शिवं स्थाणुं पुष्कराक्षं महास्वनम् ।
सम्भवं भावनं रुद्रं लोहिताक्षं नमाम्यहम् ।।४।।

अग्राह्यं शाश्वतं श्रेष्ठं ज्येष्ठं चौव प्रजापतिम् ।
ईशानमीश्वरं चौव श्रीमाधवं नमाम्यहम् ।।५।।

अनुत्तमं दुराधर्षं विक्रमं मधुसूदनम् ।
तं शत्रुनाशकं कालं सुरेश्वरं नमाम्यहम् ।।६।।

वेदं वेद्यं महावैद्यं गोविन्दं गोविदां पतिम् ।
गुरुं गुरुतमं धाम लोकाध्यक्षं नमाम्यहम् ।।७।।

सुप्रसादं सुराध्यक्षं धर्माध्यक्षं कृताकृतम् ।
उपेन्द्रं वामनं नित्यं जनार्दनं नमाम्यहम् ।।८।।

भूतं भव्यं भवन्नाथं पवनं पावनं प्रभुम् ।
कामं कामप्रदं देवं कामदेवं नमाम्यहम् ।।९।।

रामं विरामं विरजं प्राणदं परमेश्वरम् ।
करणं कारणं सर्वं सर्वेश्वरं नमाम्यहम् ।।१०।।

पद्मनाभं सुघोषं च महाधनं धनेश्वरम् ।
वत्सरं वत्सलं विश्वं सतां गतिं नमाम्यहम् ।।११।।

भगवन्तं शुभाङ्गं चौव कुमुदं कुवलेशयम् ।
वरुणं वारुणं वृक्षं पुष्कराक्षं नमाम्यहम् ।।१२।।

भूशयं भूषणं भूतिं विशोकं शोकनाशनम् ।
भूतावासं वासुदेवं महाभूतं नमाम्यहम् ।।१३।।

अनन्तं सुखदं सत्यं धनुर्वेदं धनुर्धरम् ।
सुलभं सुव्रतं सिद्धं सुलोचनं नमाम्यहम् ।।१४।।

दुर्लभं दुर्गमं दुर्गं प्राणदं प्रणवं पणम् ।
सनातनतमं सन्तं कपिलं च नमाम्यहम् ।।१५।।

यज्ञं यज्ञपतिं चौव पुष्पहासं प्रजागरम् ।
सुवर्णं श्रीधरं श्रेयः श्रीकरं च नमाम्यहम् ।।१६।।

पूर्णं पूर्णमदं पूतं पवित्रं परमं सदा ।
मङ्गलानां मङ्गलं विष्णुं देवदेवं नमाम्यहम् ।।१७।।

सिद्धार्थं सिद्धसंकल्पं सिद्धिदं सिद्धिसाधनम् ।
श्रीगर्भं श्रीनिवासं च शतानन्दं नमाम्यहम् ।।१८।।

त्रिलोकेशं महाकोशं महाभोगं महामखम् ।
महान्तं च महात्मानं महादेवं नमाम्यहम् ।।१९।।

गोपालं गहनं गोपं गोविन्दं प्रतिपालकम् ।
शिवानी नौति कृष्णं च श्रीवाराहं नमाम्यहम् ।।२०।।

# संस्कृतभाषा बहुसरला भाषा अस्ति -डॉ श्यामकुमारझावर्यः

-गोपाल कृष्ण मिश्रा

संस्कृतभारती-बिहार-द्वारा बिहारस्य पूर्वीचम्पारण्यजनपदे संस्कृत-सम्भाषणशिविरस्य तृतीयदिवसे शिविरं द्रष्टुं संस्कृतभारत्याः प्रान्तपत्राचारप्रमुखः डॉ श्यामकुमारझावर्यः आगतवान् । डॉ श्यामझामहोदयेन उक्तं यत् संस्कृतभारत्याः पाठ्यक्रमः उत्तमः तथा च पाठनशैली बहुसरला अस्ति । जनेषु या भावना आसीत् यत् संस्कृतभाषा क्लिष्टा भाषा अस्ति किन्तु दशदिवसात्मकं शिविरं गत्वा ज्ञातुं शक्यते यत् संस्कृतभाषा तु बहु सरला भाषा अस्ति । डॉ झावर्यः महात्मागान्धीकेन्द्रीयविश्वविद्यालयस्य सह-प्राध्यापकः अपि अस्ति । तत्रैव एम०एस०कॉलेज महाविद्यालयस्य सहायक-प्राध्यापकः तथा च संस्कृतभारत्याः पूर्वीचम्पारण्यजनपदे जिलामन्त्री डॉ मनीषकुमारझावर्यः अपि आगतवान् । तेन





छात्राः कथिताः यत् यदि प्रतिदिनं सततरूपेण अभ्यासः क्रियते तर्हि न केवलं संस्कृतम् अपितु किमपि शास्त्रम् अध्येतुं शक्नुवन्ति भवन्तः भवत्यश्च । अतः सम्भाषणमपि पठितुं प्रतिदिनम् आगच्छन्तु, तेनैव लाभो भविष्यति । सम्भाषणकक्ष्यायाः तृतीयदिने संस्कृतभारत्याः बिहारप्रान्तस्य सोशलमीडियाप्रमुखः गोपालकृष्णमिश्रः क्रियापदानां वाचनम् अभ्यासञ्च कारितवान् एवञ्च घट्यां समयदर्शनं, सङ्ख्यां चापि पाठितवान् । प्रशिक्षकेन मिश्रमहोदयेन सम्यक्-प्रकारेण छात्रेभ्यः सम्भाषणं पाठितम् । मिश्रवर्यस्य कक्ष्यायाम् अभयः, सचिनः, सूर्यांशः, सुवेक्षा, खुशी, प्रियाञ्जली चादयः त्रिंशदधिकाः छात्राः उपस्थिताः आसन् ।

# श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षणाधिगम- केन्द्रेण 'अधिगमपरिणामाः एवम् उद्देश्यानि - अभिकल्पनं निर्माणञ्च' इति विषये साप्ताहिक- ऑनलाइन-राष्ट्रिय सङ्कायविकासकार्यक्रमः

-डॉ.आरती शर्मा

नवदेहली। भारतसर्वकारस्य शिक्षामन्त्रालयस्य बहुआयामिपरियोजना- पण्डितमदनमोहनमालवीयराष्ट्रियशिक्षक-शिक्षणमिशनमित्यस्य अन्तर्गत्वेन स्थापितेन नवदेहलीस्थ श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षणाधिगमकेन्द्रेण 'अधिगमपरिणामाः एवम् उद्देश्यानि - अभिकल्पनं निर्माणञ्च' इति विषये साप्ताहिक-ऑनलाइन-राष्ट्रिय सङ्कायविकासकार्यक्रमस्यायोजनं 2023 तमवर्षस्य अप्रैल मासस्य 24 तः 28 दिनाङ्कपर्यन्तं कृतम्। कार्यक्रमस्यायोजनं



'गूगलमीट' इति मञ्चे कृतम्। कार्यक्रमेऽस्मिन् 52 प्रतिभागिभिः भागं ग्रहीतम्। 52 प्रतिभागिषु 44 प्रतिभागिनः पञ्चदश राज्येभ्यः, 08 प्रतिभागिनः देहली केन्द्रशासितप्रदेशतः प्रतिभागं कृतवन्तः। सम्पूर्णकार्यक्रमः 21 सत्रेषु सम्पन्नम्। तकनीकीसत्राणां सञ्चालनं शोधक्षेत्रे निष्णातानां देशस्य प्रतिष्ठानां नवविशेषज्ञानां कुशलमार्गदर्शने कृतम्, तेषां नामानि यथा- डॉ. प्रतिभासिंहः, प्रो. गौरवसिंहः, प्रो. एस.के. बावा, प्रो. अमितापाण्डेयभारद्वाजः, प्रो. सरोजपाण्डेयः, प्रो. एस.पी. मल्होत्रा, प्रो. प्रदीपकुमारमिश्रः, प्रो. शरदसिन्हा, डॉ. पीयूषपहाड़े महोदयाः। कार्यक्रमस्योद्घाटनसत्रे शिक्षणाधिगमकेन्द्रस्य निदेशिका प्रो.अमितापाण्डेयभारद्वाज महोदयया स्वागतभाषणं कार्यक्रमस्य सन्दर्भाश्च प्रस्तुताः। कार्यक्रमस्य समापनसत्रे मुख्यातिथिरूपेण प्रो. रूपकिशोरशास्त्रिमहोदयः (पूर्वकुलपतिः, गुरूकुलकांगड़ी., हरिद्वार) एवं अध्यक्षरूपेण प्रो. मुरलीमनोहरपाठक महोदयः (कुलपतिः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली) समुपस्थिताः। प्रो.अमितापाण्डेयभारद्वाज महोदयया समापनसत्रे कार्यक्रमस्य प्रतिवेदनं प्रस्तुतम्। यस्मिन् 76 प्रतिशतः प्रतिभागिनः कार्यक्रममुम् उत्कृष्ट स्थाने निश्चितवन्तः। कार्यक्रमस्य संचालनं डॉ. तमन्ना कौशल एवं डॉ. आरती शर्मणा कृतम्। कार्यक्रमस्य सुगम व्यवस्थापनं श्री सुरेन्द्र नागर-सचिनकुमार-अक्षतडबराल-ज्ञानचन्द-राकेश-रमणजीझा महोदयानां सहयोगेन जातम्।

# लघुवर्णात्मकं काव्यं संस्कृतच्छन्दोवैभवफलम्

डॉ.अरविन्दकुमारतिवारी

परिकल्पकः अमवाणीकविपरिषद्, बागपतम्।

अयि अमरवाणीसमुपासकाः सुजनतरलमानसपटलहरणक्षमाः धृतकविकनकरसकलशाः काव्यपाननिरता निरलसाः सुकवयः! भवन्तो विजयन्ताम्। तदनु सुरभारतीसमुपासकाः कवितारसकन्दग्रहणशीलाः कविकाकचेष्टासम्पन्नाः विजितवकध्यानाः रसग्राहिणो रसज्ञाः श्रोतारः! स्वनामधन्यानां सार्वभौमसंस्कृतप्रचारसंस्थानसंस्थापकानाम् आचार्यवासुदेवद्विवेदि- शास्त्रिगुरुवर्याणां संस्कृतप्रचारमार्गानुगामी तेषां कमलकोमलकरस्पर्शकृपाप्रसादजितकविवृन्दोऽरविन्दः सविनयं सादरमहं भवतो वन्दे।

श्रोतारो गुणिनो वचः प्रवचने दत्तवधाना बुधा
वक्तुर्भावविभावभावितधियः श्रृण्वन्ति मानादरात्।
आसीना सुरभारती प्रमुदिता दत्ते फलं स्वेच्छया
दत्ते किं न मुदा सुताय जननी यत्काङ्क्षितं सूनुना।।

अरविन्दस्य

मान्याः! संस्कृतभाषा भारतस्य प्राणो मन्यते। वेदादारभ्य अद्यावधि अनेके सुकवयः निजप्रतिभाप्रसूतकुसुममालाभिः रसदेवीं मातरं सरस्वतीमनुकूलयितुमयतन्त। अस्मिन्नेव प्रसंगे पद्यमवतारयामि भवतां मनोदेशं नर्तयितुम्। तदस्ति महाकविना विशालबुद्धिना प्रथितसमीक्षकेण कविताकलाप्रवीणेन आचार्यराधाबल्लभत्रिपाठिमहोदयेन विरचितं पद्ययुगलं यत् अभिराजदण्डकस्य अनुशंसायां रचितमस्ति।

अत्यन्तं विरला भवन्ति रचनाव्यापारदक्षाः पुनः
केचित् ते कवयो लयाश्च यतयो येषां तथान्यादृशाः।
साहित्ये सुकुमारवस्तुनि तथा सौन्दर्यसारान्वितं
स्वच्छन्दं रचयन्ति वक्रसरलं छन्दस्तु ते दण्डकम्।।

साहित्यस्य विशालदण्डकवने ये केऽपि पञ्चानना-
स्ते तावत् स्थगयन्तु काव्यकरणं पश्यन्तु जोषं स्थिताः।
स्वैरं सत्कवितासटामिव वहन्नेकः क्वचित् केसरी
राजेन्द्रः कुरुतेऽत्र दण्डकवने शार्दूलविक्रीडितम्।।

डॉ.कमलापाण्डेयाविरचित छन्दोधारा पृष्ठसंख्या 27

अस्माकं छन्दःपरम्परायाम् एकवर्णादारभ्य अगणितवर्णमयी रचना श्रूयते। श्रीरिति एकवर्णा दण्डकादयो बहुविधाश्चेति। अत्रान्तरे घनाक्षरमपि बहुललितं भारतीयच्छन्दःपरम्परायामद्भुतं रत्नमिवास्ति। कं जनं न विमोहयति घनाक्षरम्? मन्ये मूका अपि घूकाः घनाक्षरपीयूषवृष्टिसृष्ट्या कुपितादित्यानलनिदाघदग्धा हिमगिरिशकलसंस्पर्शसुखमिवानुभवन्तीति विद्मः। इदमेव घनाक्षरं यदि लघुवर्णैः रच्यते तदा किमपि अनिर्वचनीयं मनस्स्पन्दनं स्वयमेव समुत्थितं भवति। अहं वच्मि श्रूयतान्तावत्

यावन्नैव घनागमो रसभरो लोलोक्यते खे सखे!
तावन्नैव निदाघतापशमनं कर्तुं जनो दृश्यते।
मान्याः काव्यकलाकलापधनिकाः! तावन्न काव्योत्सवः
दग्धान् रक्षति भो घनाक्षरमयं यावन्न काव्यं वहेत्।।

अरविन्दस्य

कविसिंहा रामविनयसिंहसदृशाः घनाक्षरघनविपिनभ्रमणशीलाः श्रितबहुविधकविलीलाः केषां मनोदेशं न पावयन्ति? एते महाकविभास्कराचार्यरचितलघुवर्णमयस्य काव्यस्य साक्षात्पानकर्तारः, पूज्यजगद्गुरुवर्य रामभद्राचार्यविरचितलघुरघुवरकाव्यस्य द्रष्टारः सन्ति। अस्मिन् क्षेत्रे महाकविरभिराजराजेन्द्रमिश्रमहोदयेनापि विशिष्टा रचना कृता वर्तते। कविवरेण कामताप्रसादत्रिपाठिना रघुपमहिपमधुनामकं महाकविना मिथिलाप्रसादत्रिपाठिना अधिरघु सुमधुरं लघुवर्णमयं काव्यमस्ति सृष्टम्। साम्प्रतम् अस्मन्मित्रमणिना डॉ. शैलेशकुमारतिवारिणा, डॉ.राजकुमारमिश्रेण बन्धुना डॉ.शशिकान्ततिवारिणा प्रियकविना डॉ. राहुलपोखरियालेन मया चान्यैरपि बहुभिरज्ञातैः लघुवर्णसर्जनं क्रियमाणमस्ति। अस्य विषये विशेषज्ञ इव अस्मान् आचार्याः रहसबिहारिद्विवेदिमहोदयाः, डॉ. रामविनयसिंहमहोदयाः, आशुकवयः डॉ. तुलसीदासपरौहामहोदयाश्च ज्ञाताज्ञातविषयं बोधयिष्यन्ति। येन मादृशामपि बहूनां संस्कृतरचनारत्नाकरतटमाश्रितानां लाभो भूयादिति।

घनाक्षरम् एकत्रिंशद्वर्णात्मकं द्वात्रिंशद्वर्णात्मकं वेति भवतीति पश्यामः। तल्लक्षणं छन्दोधारायाम्। यथा

षोडशतिथिविरामि-गणदशकगुरुभी
रचितं चरणमात्रं चेद् वृत्तं घनाक्षरम्।।

मनोहरणम् इत्यस्य लक्षणम्

यथेच्छ-गणदशक-लधुद्वयेन रचितं
वसुवसुभिर्विरतिमन्मनोहरणमिति।।

इदमेव लक्षणं यदि लघुवर्णेन घटयति कविस्तदा लघु काव्यं समुद्भवति। तन्मार्गानुगामिनः सर्वे भवन्तु इति धिया अस्माभिः प्रयत्यते।

इमं विषयमधिकृत्य अमरवाणीकविपरिषच्चातुर्वेदसंस्कृतप्रचारसंस्थानयोः संयुक्तसंयोजने त्रिंशदप्रैले कविसम्मेलनेन साकमेका व्याख्यानगोष्ठी समायोजिता। यत्र अध्यक्षाः विश्रुताः संस्कृतकाव्यसमीक्षकाः आचार्याः रहसबिहारीद्विवेदिनः अवदन् यत् लघुवर्णात्मककाव्यसर्जने अल्पप्राणादिवर्णानामपि विशेषतो योजना मनोहारिणी भवति। गोष्ठ्यामादौ डॉ.तुलसीदासपरौहा स्वामिरामभद्राचार्यकृतरघुलघुकाव्यस्य सौन्दर्यविषये महत्त्वपूर्णं व्याख्यानमददात्। अनेन आशुकविना द्वित्राणि समुधराणि पद्यान्यपि सार्थं श्रावितानि। मुख्यवक्ता आचार्यरामविनयसिंहः सांगोपांगं लघुवर्णात्मककाव्यपरम्पराया विषये श्रवणीयं व्याख्यानं दत्त्वा सर्वानपि श्रोतृनममोहयत्। तेन प्रोक्तं यत् आचार्यो भास्कराचार्यः एव प्रथमः लघुवर्णकाव्यस्य रचयितेति। अस्मिन् प्रसंगे श्रीसिंहेन सिंहवत् भास्कराचार्यस्य काव्यवैभवमश्रावयत्। ततः अनेकानि सरसानि पद्यानि तेन श्रोतृभ्यः समर्पितानि। अवसरे अस्मिन् आचार्यकामताप्रसादत्रिपाठिविचरचितं रघुपमहिपमधु इति काव्यम् अपि अतीव सुन्दरमिति वक्त्रा सोदाहरणं प्रोक्तम्। देशे देशान्तरे के के लघुवर्णात्मककाव्यस्रष्टारः इति सर्वमपि विदुषा वक्त्रा रामविनयसिंहने सम्यक् प्रस्थापितम्। आदै अमरवाणीकविपरिषदः परिकल्पकः डॉ.अरविन्दकुमारतिवारी लघुवर्णात्मकेन निजेन पद्येन गोष्ठीसंचालनमारभत। मंगलाचरणम् आचार्यो निलिम्पत्रिपाठी यो हि महाकवेः भास्कराचार्यस्य सूनुः, तेन श्रावितम्। अभ्यागतानां समेषामपि स्वागतं चातुर्वेदसंस्कृतप्रचारसंस्थानस्य संस्थापकसदस्यः डॉ. चन्द्रकान्तदत्तशुक्लः समपादयत्। लघुवर्णकविसम्मेलने अस्मिन् डॉ.राहुलपोखरियालः, डॉ. रामकुमारमिश्रः विशेषरूपेण लघुवर्णकाव्यपाठमकुरुताम्। अस्य कार्यक्रमस्य सजीवप्रसारणं यूट्युबद्वारापि क्रियमाणमासीत्।

## वाराणसीस्थ-स्वामिनारायण-आनन्दतीर्थवेदविद्यालये पुरस्कारवितरणसमारोहः

संस्कृतस्य जगति तथा आविश्वे प्राचीनकालादेव आधिपत्यं वर्तते। संस्कृतं च भारतस्य प्राचीनतमा भाषा अस्ति। न केवलं प्राचीना, वैज्ञानिकभाषा अपि अस्ति । तदा एव अस्माकं




संस्कृतभाषायां वेदाः उपनिषदाः च सन्ति।एतदेव उद्देश्यं मनसि कृत्वा अद्य भारते अनेके वैदिकगुरुकुलाः संचालिताः सन्ति। वैदिकसाहित्यस्य परम्परायाः च संरक्षणार्थं स्वामी नारायण आनन्दतीर्थवेदविद्यालये वाराणसीस्थे ओम् चौरिटेबल ट्रस्ट् द्वारा १९ तमस्य वेदसमारोहपुरस्कारवितरणकार्यक्रमस्य आयोजनं कृतम्। कार्यक्रमे वाराणसीनगरस्य प्रसिद्धः संस्कृतविद्वान् डॉ. भूषण ओझा उपस्थितः आसीत् । अस्मिन् अवसरे विद्यालयस्य प्राचार्यः डॉ० जयन्तपतित्रिपाठी तथा न्यासस्य अध्यक्षः श्री एल. नारायणः एवं श्रीमान् सूर्यनारायणः अपि साक्षिणौ अभवताम्। कार्यक्रमे उत्तरप्रदेशस्य विभिन्नवैदिकविद्यालयेभ्यः ऋषिकुमाराः भागं गृहीतवन्तः ।अस्मिन् कार्यक्रमे प्रयागराजः, कानपुरम् अनयोः स्थानयोः छात्राः द्वितीयं स्थानं तथा वेद शिक्षामन्दिरं, वाराणस्याः छात्राः तृतीयं स्थानं प्राप्तवन्तः। अत्र उल्लेखनीयं यत् ये छात्राः प्रथमस्थानं प्राप्तवन्तः, तेषां पुरस्कारधनं ६ ५०० भवति तथा च येषां द्वितीयस्थानं प्राप्तम्, तेभ्यः २००० प्राप्यते तथा च ये छात्राः तृतीयस्थानं प्राप्तानां कृते पञ्चदशरूप्यकाणां शतरूप्यकाणां पुरस्कारधनं, अन्येभ्यः सर्वेभ्यः छात्रेभ्यः १५०० इत्यादयः पुरस्कारधनं दत्तम्। काशीवेदमूर्तिविद्यालयस्य छात्राः वासुदेवः न्योपाने तथा सन्तोषभट्टराई आभ्यां तृतीयं स्थानं प्राप्तम्। वेदशिक्षामन्दिरं वाराणस्याः छात्रः पूर्णेशतिवारी एवं इन्द्रेशदीक्षितः, मयंकमिश्रः तथा प्रयागशुक्लः अपि सांत्वनापुरस्कारं प्राप्तवन्तः। केवलं ऋषिकुमाराः तेषां परिश्रमस्य आधारेण एतत् पुरस्कारं प्राप्तवन्तः। अस्मिन् अवसरे गुरुकुलस्य आदरणीयप्राचार्यमहोदयः आचार्यटीकारामरिजालमहोदयः सङ्गणकप्रशिक्षिका ट्विंकलमोहान्तिः, नित्यकुमारः, भार्गवः, प्रयागमिश्रः, आयुषः, दुर्गेशसहित छात्राः तथा गुरुकुलस्य आचार्याः सम्भूय ऋषिकुमारेभ्यः अभिनन्दनानि शुभकामनाश्च दत्तवन्तः।

## भारतीयसंस्कृतेः वैदिकपरंपरायाश्च आधारः वेदाः-माननीयः रामनाथकोविंदः

नवदिल्ली। महर्षि दयानंद सरस्वत्याः 200 तम जयंत्यां पूसा संस्थान स्थिते सी. सुब्रमण्यम सभागारे आयोजितस्य दो दिवसीय अखिल भारतीय वेद विज्ञान सम्मेलनस्य द्वितीये दिने, पूर्व राष्ट्रपतिः रामनाथ कोविंदः मुख्यातिथि रुपेण उक्तवान् यत् वेदाः अस्माकं भारतीय संस्कृतेः



वैदिक परंपराणाम् आधाराः। इयं सनातन धर्मस्य विशेषता यत् अस्मत् संस्कृतिः अद्यापि अपरिवर्तनीया । वेदाः उपनिषदः संहिताश्च अद्यतन संदर्भे वर्तमान राज्य संरचनायाः महत्वपूर्णाः सभारतस्य क्षमताभिः जगत् प्रभावितं वेदस्य न केवलं ज्ञानम् अपितु ते जीवितव्याः व्यवहरणीयाश्च। वेदानाम् अनुभूतिः कार्या , ज्ञातुं यत्न करणीयः । अस्मिन् अवसरे परमार्थ निकेतनस्य स्वामी चिदानंद सरस्वती , पुरोहितः सभाध्यक्षः प्रेमपाल शास्त्री , सासनी कन्या गुरुकुल महाविद्यालयस्य प्राचार्या पवित्रा, संस्कृत शिक्षक संघ दिल्ल्याः अध्यक्षः डॉ. बृजेश गौतमः , डॉ सत्यकाम शर्मा वेदालंकारः, सार्वदेशिक आर्य प्रतिनिधि सभायाः महामंत्री प्रोफेसर विट्ठलरावः, धर्मपाल आर्यः, एवं स्वामी प्रणवानंद सरस्वती इत्यादयः विद्वांसः अपि समुपस्थिताः।

**प्रथमपुटस्य शेषभागः**

## महर्षिदयानन्दसरस्वत्याः २००तमजयन्तीमुद्दिश्य....

श्रेष्ठ संस्कृतिं निर्मीतः पतंजलि योगपीठस्य परमाध्यक्षः, आचार्य बालकृष्णः वीडियो संदेशे सर्वेभ्यःक्ष शुभकामनाः दत्ताः यत् विश्व कल्याणाय सत्यरक्षायै वेदाः अत्यंतम् आवश्यकाः स तस्यां दिशि पतंजलिः योजनाबद्धरूपेण कार्यं करोति। अध्यक्षीय उद्बोधने केंद्रीय कृषि मंत्री नरेंद्र तोमरः कथितवान् यत् भारतीय संस्कृतेः चिंतने विश्वकल्याणस्य मार्गः निहितः। भारतं वसुधैव



कुटुंबकम् इतिमार्गम् अनुसरति चलता है। समग्रसृष्टेः विकासस्य मार्गः वेदैरेव उपदिष्टः। स्वामी आर्यवेशः, स्वामी प्रणवानंद सरस्वती, स्वामी प्रदुम शास्त्री च स्वविचारम् उपस्थापितवन्तः। कार्यक्रमसंचालनं प्रो धर्मेंद्र शास्त्री अकरोत्। उद्घाटन सत्र समापने राष्ट्रियगानेन, शांतिपाठेन च अभूत्।

## 'राष्ट्रिय-शिक्षानीतौ संस्कृतम्' विषये व्याख्यानम्

-डॉ. मूलचन्द्र-शुक्लः

पीएनजी-राजकीय-स्नातकोत्तर-महाविद्यालय- रामनगरस्य संस्कृतविभागद्वारा 'राष्ट्रिय- शिक्षानीतौ संस्कृतम्' इति विषये आनलाइनगुरुदिवस-व्याख्यानमाला आयोजिता। अत्र मुख्यवक्तृत्वेन उत्तराखण्ड-संस्कृत-विश्वविद्यालय-हरिद्वारस्य डॉक्टर कंचन तिवारी-महोदयेन 'राष्ट्रिय- शिक्षानीतिरालोके




संस्कृतम्' इत्यस्मिन् विषये व्याख्यानं विहितम्। डॉक्टर तिवारी प्रभावपूर्णरीत्या उक्त-नीतौ उल्लिखित-संस्कृतस्य आधुनिक-पारम्परिक-परम्परयोः सम्बद्धप्रमुख-बिन्दून् उद्घाटयति।यथा- व्याकरणम् ,राजशास्त्रम्, अर्थशास्त्रमृ, 64- कलाः, खगोलशास्त्रम्, विमानशास्त्रम् ,वैदिकगणितम्-आदि विषयकग्रन्थैः सह आधुनिकविषयाणां संयोजनेन बहुविषयकपाठ्यक्रमनिर्माणेन च विद्यार्थीनां बहुमुखी-विकासः सम्भवति ! नीतौ संस्कृतस्य ज्ञान-विज्ञानविषयाणां पठन-पाठनेन सह संस्कृत-संस्थानानामपि संरक्षणार्थं संवर्धनार्थं च उल्लेखः कृतो वर्ततेद्यव्याख्यानस्यास्य प्रारम्भे संस्कृतविभागाध्यक्षः,आयोजकसचिवः डॉ. मूलचन्द्रशुक्लः स्वीये प्रास्ताविकोद्बोधने वक्ति यत् वर्तमानकालेऽपि संस्कृतस्य प्रासङ्गिकतां विलोक्यैव नीतिप्रणेतारः संस्कृतस्य वैशिष्ट्यसन्दर्भान् नीतौ प्रस्तुतवन्तः। मुख्यातिथिना राष्ट्रपत्यादिपुरस्कारसभाजितेन वरिष्ठसाहित्यकारेण डॉ. कीर्ति- वल्लभ-शक्टा-महोदयेन उक्तं यत् पूर्वं केवलं कर्मकाण्डादीनां भाषाविषयत्वेन मन्यमानं संस्कृतं सम्प्रति राष्ट्रियशिक्षानीतौ समुचितस्थानं लब्धवत्। विशिष्टातिथिः प्रोफे.जया तिवारी,संस्कृतविभागाध्यक्षा कुमाऊं-विश्वविद्यालयः,नैनीतालम् अनया प्रोक्तं यत् राष्ट्रियशिक्षानीतिः वेदादि-संस्कृतशास्त्रेषु निहितं ज्ञान-विज्ञानं समाजस्य समक्षे आनेतुमवसरं प्रददाति। अस्य कार्यक्रमस्य कार्यक्रमनिदेशकः प्राचार्यः प्रोफे.एम.सी.पाण्डे महोदयो वर्ततेद्य अनेन गुरुदिवस-व्याख्यानमालायाः द्वितीयश्रृंखला-क्रमः समारब्धः, तथा च तेन अतिथीनां स्वागतपूर्वकं व्याख्यानमालाया उद्देश्यम् 'विद्यार्थिनः यावत् बहुविषयक-ज्ञानं प्रसरेत्' इत्युक्तम् । कार्यक्रमान्ते कुलानुशासकः प्रोफेसर जीसी पन्तः अतिथिभिः सह समेषां प्रतिभागिनां कातज्ञ्यं निवेदितवान्। कार्यक्रमे तकनीकिसहयोगः डा. अनुराग श्रीवास्तवः, डा. दीपक खाती, डा.प्रकाशसिंहबिष्ट इत्यादिभिः प्रदत्तः। धन्यवादज्ञापनपुरस्सरं शान्तिमन्त्रेण कार्यक्रमः समाप्तिमेति।

अस्माकं प्रेरणास्रोतः- स्व.पं० रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारी, डॉ. राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलः- डॉ.सुन्दरनारायणझा, डॉ. सुरेन्द्रमहतो, डॉ. सन्नीकुमार, डॉ. संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।